# Shri Dunduramacharyapranitam Bhaktanirupanam

# શ્રીદુન્દુરામાચાર્યપ્રણીતં ભક્તનિરૂપણં

## Document Information

Text title : Shri Dunduramacharyapranitam Bhaktanirupanam

File name : bhaktanirUpaNaMdundurAmAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : dundurAmAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

Shri Dunduramacharyapranitam Bhaktanirupanam

# શ્રીદુન્દુરામાચાર્યપ્રણીતં ભક્તનિરૂપણં

શ્રીસુશીલાસુતં નત્વા ભાષ્યકારં તથા ગુરુમ્ ।
ભક્તલક્ષણબોધાય કુર્વે ભક્તનિરૂપણમ્ ॥ ૧॥

જ્ઞાનિનઃ શાન્તચિત્તાશ્ચ દયાશીલા ગતસ્પૃહાઃ ।
પરેષાં પીડકા યે ન શ્રેષ્ઠા ભક્તાશ્ચ તે મતાઃ ॥ ૨॥

અન્યદોષં ન પશ્યન્તિ સર્વપ્રાણિહિતૈષિણઃ ।
ઈર્ષ્યાવિરહિતા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૩॥

સઙ્ગ્રહવૃત્તિહીનાશ્ચ તુષ્યન્તિ સ્વલ્પતશ્ચ યે ।
ભગવત્પાદભક્તાશ્ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૪॥

રામયજ્ઞસહાયાશ્ચ સર્વત્ર સમદર્શિનઃ ।
શ્રીરામપૂજકા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૫॥

નન્દન્તિ વીક્ષ્ય રામાર્ચાં સ્વાચાર્યગ્રન્થપાઠકાઃ ।
નિન્દ્યકર્મવિહીના યે શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૬॥

નાસત્યવાદિનો યે ચ પ્રિયસત્યસ્ય ભાષિણઃ ।
ગ્રાહકાઃ સદ્ગુણાનાં યે શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૭॥

પરેષાં હાનિલાભૌ તુ સ્વીયવત્ વીક્ષકાશ્ચ યે ।
સાધુસેવારતા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૮॥

ભાગવતકથાયાશ્ચ શ્રવણે કથને તથા ।
નિરતાઃ સાત્ત્વિકા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૯॥

ઉત્કણ્ઠિતાશ્ચ યે નિત્યં ભગવન્નામકીર્ત્તને ।
રોમાઞ્ચશાલિનો યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૧૦॥

ચ્યુતા નાશ્રમધર્મેભ્યશ્ચાતિથિપૂજકાશ્ચ યે ।
ગુરુશાસ્ત્રવશા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૧૧॥

સંસ્કારપઞ્ચકાપન્ના આકારત્રયશાલિનઃ ।
રહસ્યત્રયવેત્તારઃ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૧૨॥

અર્થપઞ્ચકતત્ત્વજ્ઞા રામકૈઙ્કર્યકારકાઃ ।
સદાચારરતા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૧૩॥

સાત્વિકાહારશીલાશ્ચ વૈષ્ણવા હરિચિન્તકાઃ ।
એકાદશીવ્રતાસક્તાઃ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૧૪॥

સચ્છાસ્ત્રે સગુણે સક્તાઃ સન્નિષ્ઠાઃ સત્પ્રવૃત્તયઃ ।
વિષયેભ્યો વિરક્તા યે શ્રેષ્ઠા ભક્તાશ્ચ તે મતાઃ ॥ ૧૫॥

વૈષ્ણવાનાં ચ પૂજાયાં કીર્ત્તને વન્દને તથા ।
શ્રદ્ધયોત્કણ્ઠિતા યે ચ શ્રેષ્ઠા ભક્તાશ્ચ તે મતા ॥ ૧૬॥

દ્વારપીઠેશ્વરશ્રીમદ્દુન્દુરામાર્યનિર્મિતમ્ ।
ભગવદ્ભક્તિદં ભૂયાદેતદ્ ભક્તનિરૂપણમ્ ॥ ૧૭॥

ઇતિ શ્રીદુન્દુરામાચાર્યપ્રણીતં ભક્તનિરૂપણં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Dunduramacharyapranitam Bhaktanirupanam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*